# AyurdevI stotram

# आयुर्देवी स्तोत्रम्

## Document Information

Text title : AyurdevIstotram

File name : AyurdevIstotram.itx

Category : devii

Location : doc_devii

Proofread by : PSA Easwaran

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# आयुर्देवी स्तोत्रम्

ध्यायेद्धेमाम्बुजारूढां वरदाभयपाणिकाम् ।
आयुष्यदेवतां नित्यामाश्रिताभीष्टसिद्धिदाम् ॥ १॥

आयुर्देवि महाप्राज्ञे सूतिकागृहवासिनि ।
पूजिता परया भक्त्या दीर्घमायुः प्रयच्छ मे ॥ २॥

सिंहस्कन्धगतां देवीं चतुर्हस्तां त्रिलोचनाम् ।
शक्तिशूलगदापद्मधारिणीं चन्द्रमौलिकाम् ॥ ३॥

विचित्रवस्त्रसंयुक्तां स्वर्णाभरणभूषिताम् ।
सिंहस्कन्धगतां देवीं चतुर्हस्तां त्रिलोचनाम् ॥ ४॥

सिंहस्कन्धगते देवि सुरासुरसुपूजिते ।
प्रभवात्यब्दके सङ्घे आयुर्देवि नमोऽस्तु ते ॥ ५॥

आयुर्देवि नमस्तुभ्यं वर्षदेवि नमोऽस्तु ते ।
आयुर्देहि बलं देहि सर्वारिष्टं व्यपोहय ॥ ६॥

आयुष्मदात्मिकां देवीं करालवदनोज्ज्वलाम् ।
घोररूपां सदा ध्यायेदायुष्यं याचयाम्यहम् ॥ ७॥

शुभं भवतु कल्याणि आयुरारोग्यसम्पदाम् ।
सर्वशत्रुविनाशाय आयुर्देवि नमोऽस्तु ते ॥ ८॥

षष्ठांशां प्रकृतैस्सिद्धां प्रतिष्ठाप्य च सुप्रभाम् ।
सुप्रदां चापि शुभदां दयारूपां जगत्प्रसूम् ॥ ९॥

देवीं षोडशवर्षां तां शाश्वतस्थिरयौवनाम् ।
बिम्बोष्ठीं सुदतीं शुद्धां शरच्चन्द्रनिभाननाम् ॥ १०॥

नमो देव्यै महादेव्यै सिद्ध्यै शान्त्यै नमो नमः ।
शुभायै देवसेनायै आयुर्देव्यै नमो नमः ॥ ११॥

वरदायै पुत्रदायै धनदायै नमो नमः ।
सृष्ट्यै षष्ठांशरूपायै सिद्धायै च नमो नमः ॥ १२॥

मायायै सिद्धयोगिन्यै आयुर्देव्यै नमो नमः ।
सारायै शारदायै च परादेव्यै नमो नमः ॥ १३॥

बालारिष्टहरे देवि आयुर्देव्यै नमो नमः ।
कल्याणदायै कल्याण्यै फलदायै च कर्मणाम् ॥ १४॥

प्रत्यक्षायै स्वभक्तानामायुर्देव्यै नमो नमः ।
देवरक्षणकारिण्यै आयुर्देव्यै नमो नमः ॥ १५॥

शुद्धसत्त्वस्वरूपायै वन्दितायै नृणां सदा ।
वर्जितक्रोधहिंसायै आयुर्देव्यै नमो नमः ॥ १६॥

इति आयुर्देवी स्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*AyurdevI stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*